[For use in daily upaasana]

# १३. श्रीअमोघशिवकवचम्

ॐ अस्य श्रीशिवकवचस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः अनुष्टुप् छन्दः, श्रीसदाशिवरुद्रो देवता, श्रीं ह्रीं क्लीं बीजं, ह्रीं शक्तिः, रं कीलकम् । श्रीसदाशिवप्रीत्यर्थे शिवकवचस्तोत्रजपे विनियोगः ।

ध्यानम् वज्रदंष्ट्रं त्रिनयनं कालकण्ठमरिन्दमम् ।
सहस्रकरमत्युग्रं वन्दे शम्भुमुमापतिम् ॥
अतः परं सर्वपुराणगुह्यं निःशेषपापौघहरं पवित्रम् ।
जयप्रदं सर्वविपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ते ॥

**मन्त्रः**

ऋषभ उवाच

नमस्कृत्य महादेवं विश्वव्यापिनमीश्वरम् ।
वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम् ॥ १ ॥

शुचौ देशे समासीनो यथावत्कल्पितासनः ।
जितेन्द्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ॥ २ ॥

हृत्पुण्डरीकान्तरसन्निविष्टं स्वतेजसा व्याप्तनभोऽवकाशम् ।
अतीन्द्रियं सूक्ष्ममनन्तमाद्यं ध्यायेत् परानन्दमयं महेशम् ॥ ३ ॥

ध्यानावधूताखिलकर्मबन्धश्चिरं चिदानन्दनिमग्नचेताः ।
षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षाम् ॥ ४ ॥

मां पातु देवोऽखिलदेवतात्मा संसारकूपे पतितं गभीरे ।
तन्नाम दिव्यं वरमन्त्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥ ५ ॥

सर्वत्र मां रक्षतु विश्वमूर्तिः ज्योतिर्मयानन्दघनश्चिदात्मा ।
अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ ६ ॥

यो भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोऽष्टमूर्तिः ।
योऽपां स्वरूपेण नृणां करोति सञ्जीवनं सोऽवतु मां जलेभ्यः ॥ ७ ॥

कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ।
स कालरुद्रोऽवतु मां दवाग्नेः वात्यादिभीतेरखिलाच्च तापात् ॥ ८ ॥

प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ।
चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यां स्थितो रक्षतु मामजस्रम् ॥ ९ ॥

कुठारखेटाङ्कुशपाशशूलकपालमालाग्निकणान्दधानः ।
चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम् ॥ १० ॥

कुन्देन्दुशङ्खस्फटिकावभासो वेदाक्षमालावरदाभयाङ्कः ।
त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योऽधिजातोऽवतु मां प्रतीच्याम् ॥ ११ ॥

वराक्षमालाऽभयटङ्कहस्तः सरोजकिञ्जल्कसमानवर्णः ।
त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥ १२ ॥

वेदाभयेष्टाङ्कुशटङ्कपाशकपालढक्काक्षरशूलपाणिः ।
सितद्युतिः पञ्चमुखोऽवतान्माम् ईशान ऊर्ध्वं परमप्रकाशः ॥ १३ ॥

मूर्धानमव्यान्मम चन्द्रमौलिः फालं ममाव्यादथ फालनेत्रः ।
नेत्रे ममाव्याद् भगनेत्रहारी नासां सदा रक्षतु विश्वनाथः ॥ १४ ॥

पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली ।
वक्त्रं सदा रक्षतु पञ्चवक्त्रो जिह्वां सदा रक्षतु वेदजिह्वः ॥ १५ ॥

कण्ठं गिरीशोऽवतु नीलकण्ठः पाणिद्वयं पातु पिनाकपाणिः ।
दोर्मूलमव्यान्मम धर्मबाहुः वक्षःस्थलं दक्षमखान्तकोऽव्यात् ॥ १६ ॥

ममोदरं पातु गिरीन्द्रधन्वा मध्यं ममाव्यान्मदनान्तकारी ।
हेरम्बतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥ १७ ॥

स्मरारिरव्यान्मम गुह्यदेशं पृष्ठं सदा रक्षतु पार्वतीशः ।
ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीशवरोऽव्यात् ।
जङ्घायुगं पुङ्गवकेतुरव्यात् पादौ ममाव्यात्सुरवन्द्यपादः ॥ १८ ॥

महेश्वरः पातु दिनादियामे मां मध्ययामेऽवतु वामदेवः ।
त्रिलोचनः पातु तृतीययामे वृषध्वजः पातु दिनान्त्ययामे ॥ १९ ॥

पायान्निशादौ शशिशेखरो मां गङ्गाधरो रक्षतु मां निशीथे ।
गौरीपतिः पातु निशावसाने मृत्युञ्जयो रक्षतु सर्वकालम् ॥ २० ॥

अन्तःस्थितं रक्षतु शङ्करो मां स्थाणुः सदा पातु बहिःस्थितं माम् ।
तदन्तरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समन्तात् ॥ २१ ॥

तिष्ठन्तमव्याद् भुवनैकनाथः पायाद्व्रजन्तं प्रमथाधिनाथः ।
वेदान्तवेद्योऽवतु मां निषण्णं मामव्ययः पातु शिवः शयानम् ॥ २२ ॥

मार्गेषु मां रक्षतु नीलकण्ठः शैलादिदुर्गेषु पुरत्रयारिः ।
अरण्यवासादि महाप्रवासे पायान्मृगव्याध उदारशक्तिः ॥ २३ ॥

कल्पान्तकालोग्रपटुप्रकोपः स्फुटाट्टहासोच्चलिताण्डकोशः ।
घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः ॥ २४ ॥

पत्त्यश्वमातङ्गरथावरूथिनीसहस्रलक्षायुतकोटिभीषणम् ।
अक्षौहिणीनां शतमाततायिनां छिन्द्यान्मृडो घोरकुठारधारया ॥ २५ ॥

निहन्तु दस्यून्प्रलयानलार्चिः ज्वलत्त्रिशूलं त्रिपुरान्तकस्य ।
शार्दूलसिंहर्क्षवृकादिहिंस्रान् सन्त्रासयत्वीशधनुः पिनाकः ॥ २६ ॥

दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्य दुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि ।
उत्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्च नाशयतु मे जगतामधीशः ॥२७॥

ॐ नमो भगवते सदाशिवाय, सकलतत्त्वात्मकाय, सर्वमन्त्रस्वरूपाय, सर्वयन्त्राधिष्ठिताय, सर्वतन्त्रस्वरूपाय, सर्वतत्त्वविदूराय, ब्रह्मरुद्रावतारिणे, नीलकण्ठाय, पार्वतीमनोहरप्रियाय, सोमसूर्याग्निलोचनाय, भस्मोद्धूलितविग्रहाय, महामणिमुकुटधारणाय, माणिक्यभूषणाय, सृष्टिस्थितिप्रलयकालरौद्रावताराय, दक्षाध्वरध्वंसकाय, महाकालभेदनाय, मूलाधारैकनिलयाय, तत्त्वातीताय, गङ्गाधराय, सर्वदेवादिदेवाय, षडाश्रयाय, वेदान्तसाराय, त्रिवर्गसाधनाय, अनन्तकोटिब्रह्माण्डनायकाय, अनन्त-वासुकि-तक्षक-कार्कोटक-शङ्ख-गुलिक-पद्म-महापद्मेति अष्टमहानाग-कुलभूषणाय, प्रणवस्वरूपाय, चिदाकाशाय, आकाशदिक्-स्वरूपाय, ग्रहनक्षत्रमालिने, सकलाय, कलङ्करहिताय, सकललोकैककर्त्रे, सकललोकैकभर्त्रे, सकललोकैकसंहर्त्रे, सकललोकैकगुरवे, सकललोकैकसाक्षिणे, सकलनिगमगुह्याय, सकलवेदान्तपारगाय, सकललोकैकवरप्रदाय, सकललोकैकशङ्कराय, सकलदुरितार्तिभञ्जनाय, सकलजगदभयङ्कराय ।

शशाङ्कशेखराय, शाश्वतनिजावासाय, निराकाराय, निराभासाय, निरामयाय, निर्मलाय, निर्लोभाय, निर्मदाय, निश्चिन्ताय, निरहङ्काराय, निरङ्कुशाय, निष्कलङ्काय, निर्गुणाय, निष्कामाय, निरुपप्लवाय, निरवद्याय, निरन्तराय, निष्कारणाय, निरन्तकाय, निष्प्रपञ्चाय, निस्सङ्गाय, निर्द्वन्द्वाय, निराधाराय ।

नीरागाय, निष्क्रोधाय, निर्लोपाय, निष्पापाय, निर्भयाय, निर्विकल्पाय, निर्भेदाय, निष्क्रियाय, निस्तुलाय, निस्संशयाय, निरञ्जनाय, निरुपमविभवाय, नित्यशुद्धबुद्धमुक्तपरिपूर्णसच्चिदानन्दाद्वयाय, परमशान्तस्वरूपाय, परमशान्तप्रकाशाय, तेजोरूपाय, तेजोमयाय, तेजोऽधिपतये, जय जय रुद्र महारुद्र, महारौद्र, भद्रावतार, महाभैरव, कालभैरव, कल्पान्तभैरव ।

कपालमालाधर, खट्वाङ्गचर्मखड्गधर, पाशाङ्कुश-डमरु-त्रिशूल-चाप- बाण-गदा-शक्ति-भिण्डिवाल-तोमर-मुसल-भुशुण्डिमुद्गर-पाश- परिघशतघ्नी-चक्राद्यायुधभीषणाकार, सहस्रमुख, दंष्ट्राकरालवदन, विकटाट्टहास, विस्फाटितब्रह्माण्डमण्डल, नागेन्द्रकुण्डल, नागेन्द्रहार, नागेन्द्रवलय, नागेन्द्रचर्मधर, नगेन्द्रनिकेतन, मृत्युञ्जय, त्र्यम्बक, त्रिपुरान्तक ।

विश्वरूप, विरूपाक्ष, विश्वेश्वर, वृषभवाहन, विषविभूषण, विश्वतोमुख, सर्वतोमुख मां रक्ष रक्ष, ज्वल ज्वल, प्रज्वल, प्रज्वल, महामृत्युभयं शमय शमय, अपमृत्युभयं नाशय नाशय, रोगभयम् उत्सादयोत्सादय, विषसर्पभयं शमय शमय, चोरान् मारय मारय, मम शत्रून् उच्चाटयोच्चाटय ।

त्रिशूलेन विदारय विदारय, कुठारेण भिन्धि भिन्धि, खड्गेन छिन्धि छिन्धि, खट्वाङ्गेन विपोथय विपोथय, मम पापं शोधय शोधय, मुसलेन निष्पेषय निष्पेषय, बाणैः सन्ताडय सन्ताडय, यक्षरक्षांसि भीषय भीषय, अशेषभूतान् विद्रावय विद्रावय, कूष्माण्डभूतवेतालमारीगणब्रह्मराक्षसगणान् सन्त्रासय सन्त्रासय।

मम अभयं कुरु कुरु, नरकभयान्माम् उद्धर उद्धर, वित्रस्तं माम् आश्वासय आश्वासय, अमृतकटाक्षवीक्षणेन माम् आलोकय आलोकय, सञ्जीवय सञ्जीवय, क्षुत्तृष्णार्तं माम् आप्यायय आप्यायय, दुःखातुरं माम् आनन्दय आनन्दय, शिवकवचेन माम् आच्छादय आच्छादय, हर हर, मृत्युञ्जय, त्र्यम्बक, सदाशिव, परमशिव, नमस्ते नमस्ते नमः ॥